# Suranganabhih Krita Devi Stuti

# સુરાઙ્ગનાભિઃ કૃતા દેવીસ્તુતિઃ

## Document Information

Text title : Suranganabhih Krita Devi Stuti

File name : devIstutiHsurAnganAbhiHkRRitA.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhavAkhyaH dvitIyAMshaH | adhyAyaH 30 ||

Latest update : September 16, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# સુરાઙ્ગનાભિઃ કૃતા દેવીસ્તુતિઃ

દયારસઘને શિવે વિકચપઙ્કજાસ્યેઽમ્બિકે
સુચમ્પકસરાવલીમધુરગન્ધજાજીસરૈઃ ।
સુગુચ્છવરમલ્લિકાવિધૃતપાટલોશીરકૈ-
ર્વિરાજિતકપર્દકે વિલસદિન્દુકોટીરકે ॥ ૧॥

નમત્સુરપદામ્બુજે (નમસ્સુરપદામ્બુજે, નમસ્સુરવરપ્રદે)
ભવહરે (ભવહરં) નમસ્તે નમઃ ॥

મઞ્જીરશિઞ્જિતરણન્મણિપાદયુગ્મકઞ્જો-
પમાનકરણાયિતલક્તકોહ્યમ્ ।
પાદદ્વયં સુરગણોત્તમમૌલિકોટિઘૃષ્ટં
સુસન્નખજિતામ્બરકાન્તિકાન્તમ્ ॥ ૨॥

(મઞ્જીરશિઞ્જિતરણન્મણિપાદયુગ્મકઞ્જો-
પમાનકરણાયિતલક્તકોદ્યપાદદ્વયમ્ ।
સુરગણોત્તમમૌલિકોટિ-
ઘૃષ્ટં સુસન્નખજિતામ્બર કાન્તિકાન્તં)॥ ૨॥

ત્વામમ્બ(ત્વામમ્બં)ચામ્બુરુહગર્ભરસાસ્યનેત્રે
લગ્ના વિલગ્નહૃદયાસ્તુતરાં નમસ્તે ॥ ૩॥

જય દેવિ જગદ્વન્દ્યે પ્રપન્નાર્તિહરે શિવે ।
તવ પાદામ્બુજદ્વન્દ્વદર્શનં નઃ ક્વ વા ભવેત્ ॥ ૪॥

તવપાદામ્બુજાર્ચાતોધન્યામાન્યાસ્સુરાસુરાઃ ।
શિવવામાઙ્કભાગસ્થાસદાકૈલાસવાસિની ॥ ૫॥

તવપાદપ્રભાજાલૈર્ધૃતા (પ્રભાજાલૈર્ઝતા, પ્રભાજાલૈર્ઘૃષ્ટા) લોકત્રયાવલી ।
અદ્ય ધન્યતરઃ કાલોહ્યદ્ય ધન્યે વિલોચને ॥ ૬॥

મુનિદેવાઙ્ગનાસ્સર્વા યત્તેદૃષ્ટં પદદ્વયમ્ ।

વેદૈરપિ હ્યવિજ્ઞાતં વેદાન્તૈરપિ તે પદમ્ ॥ ૭॥

તવાદ્ય દર્શનં જાતં સફલા નો મનોરથાઃ ॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભવાખ્યે સુરાઙ્ગનાભિઃ કૃતા દેવીસ્તુતિઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભવાખ્યઃ દ્વિતીયાંશઃ । અધ્યાયઃ ૩૦ ॥

- .. shrIshivarahasyam . bhavAkhyaH dvitIyAMshaH . adhyAyaH 30 ..

Noes:
Devi is eulogized at Kailasa, by Wives of Muni-s and Deva-s; viz. Lakshmi, Vani (Saraswati), Shachi et al.
Shloka-s have been renumbered, as the shloka numbering has been found to differ amongst the two referenced source texts.

Proofread by Ruma Dewan

*Suranganabhih Krita Devi Stuti*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*